Sadvidya Journal of Sanskrit and Indian Knowledge Systems
DOI: 10.18311/sadvid/2025/55284

संस्कृतसाहत्ये अल्पपरचिति-काव्यकारस्य बालकृष्णभट्टस्य योगदानम्

Devashri

Officer, Assistant Teacher, Bagadhar Brahma Kisan College, Baxa, Jalah, Assam -781327, India; debarshiedu@gmail.com

अस्माकं शोधपत्रस्यस्य वषियीभूतः आलङ्कारकिः अस्ति बालकृष्णभट्टः। शोधपत्रेऽस्मिन् बालकृष्णभट्टस्य च जीवनकाल; तस्य व्यक्तकि्त्वं कृतत्विञ्च वशि्लेषतिमस्ति। अत्र तस्य वषिये अधस्तादुपस्थाप्यते –

1. श्रीबालकृष्ण

संस्कृतसाहत्येतहिासे बालकृष्णभट्टनामधेयाः नैके साहत्यिकाराः वद्विांसः आचार्याश्च उपलभ्यन्ते । तेषु लालूभट्टोपनामकः गूढार्थदीपकिा – ख्यातववकि – नरिीधलक्षण – ववृतिि – नरि्णयार्णव – योजनाटीका – प्रमेयरत्नार्णव – सेवाकौमुदी – नबिन्धववृतियोजनाटीकानां प्रणेता बालकृष्णभट्ट; न्यायसद्धिान्तमुक्तावलीप्रकाश कारः बालकृष्णभट्ट; कात्यायनप्रणीतस्य मूल्याध्यायस्य वृत्तकिारः बालकृष्णभट्ट; अभज्ञिानशाकुन्तलस्य टीकाकारः बालकृष्णभट्ट; आर्यासप्तशत्याः उपरि रसकिचन्द्रकिाटीकाकारः बालकृष्णभट्ट; उत्तररामचरतिस्य अपेक्षतिव्याख्यानकारः बालकृष्णभट्ट; जैमनिसिूत्राणाम् उपरि टीकायाः प्रणेता बालकृष्णभट्ट; ऐकाहकिचातुर्मासस्य प्रयोगकारः बालकृष्णभट्ट; मयूरवरिचितिस्य सूर्यशतकस्य टीकाकारःबालकृष्णभट्ट; अलङ्कारसारप्रणेता त्रधिरोपनामकः बालकृष्णभट्ट; जातककौस्तुभ – ताजकिकौस्तुभ – योगनिीदशकर्म – नारायणस्तोत्र – महागणपतस्तिोत्र – शङ्करस्तोत्र–शविस्तोत्र–शङ्कानरि्णय–त्रवविणीस्तोत्राणां रचयति बालकृष्णभट्ट; जीवत्पतृिककर्तव्यनरि्णय – शवािेत्कर्षप्रकाश – शवािेत्कर्षरत्नाकराणां प्रणेता बालकृष्णभट्ट; श्रौतप्रायश्चतिस्य कर्ता बालकृष्णभट्ट; सूतकनरि्णयकारः बालकृष्णभट्टश्चैते षोडश बालकृष्णभट्टाः उल्लेखयोग्याः सन्ति । *The New Catalogus Catalogorum* इत्यत्र उक्तानां बालकृष्णभट्टनामधेयानां वदिुषामाचार्याणां क्रमबद्धा सूची सन्नविष्टिा वर्तते ।[1]

कन्ित्वत्र उल्लेखनीयमस्ति यत् उक्तेषु षोडशबालकृष्णभट्टेषु द्वौ वल्लभसम्प्रदायानुयायनिौ स्तः । अस्माकं शोधग्रन्थयोः अन्यतमस्य अलङ्कारसारस्य रचयति बालकृष्णभट्टः अपि वल्लभसम्प्रदाये दीक्षतिः वल्लभसम्प्रदायानुयायी वदियते । असौ लालूभट्टोपनाम्नाऽपि ज्ञायते । वल्लभसम्प्रदायानुयायी अपरो बालकृष्णभट्टः त्रधिरोपनाम्ना अभधीयते। अतःअनयोःअलङ्कारसारस्य प्रणेता कः? लालूभट्टोपनामकः बालकृष्णभट्टः अथवा त्रधिरोपनामकः बालकृष्णभट्टः? अयमेवात्र अस्माकमनुसन्धानवषियः। तयोः जीवनकालरचनादीनामनुशीलनेन वषियेऽस्मिन् कमपि नरि्णयं कर्तुमधोलखितिदशिा प्रयततिमस्ति –

2. लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य जीवनम्

श्रीवल्लभाचार्यस्य सम्प्रदाये दीक्षतिस्य श्रीलालूभट्टोपनामयुक्तस्य श्रीबालकृष्णभट्टस्य वषिये अनेकानि तथ्यानि प्राप्यन्ते । प्रमेयरत्नार्णवग्रन्थस्य उपोद्घातानुसारं श्रीमधुसूदनभट्टः श्रीबालकृष्णभट्टस्य पतिा अस्ति । प्रमेयरत्नार्णवग्रन्थस्यानुशीलनेन ज्ञायते यत् तैलङ्गदेशीयाः केचन वद्विांसः ब्राह्मणाः श्रीवट्ठिलनाथदीक्षतिेन गोकुले संस्थाप्यन्ते । तेषु ब्राह्मणेषु श्रीवश्विनाथभट्टस्य पुत्रद्वयमस्ति – गोवन्दिभट्टः कृष्णभट्टश्च । वश्विनाथस्य एका कन्यकाऽपि अस्ति - रुक्मणिी । रुक्मणि्या सह श्रीवट्ठिलनाथदीक्षतिस्य ववािहः भवति । अस्य वश्विनाथभट्टस्य वंशजः अस्ति मधुसूदनभट्टः । मधुसूदनभट्टस्य पुत्रः अस्ति श्रीबालकृष्णभट्टः यस्य उपनाम अस्ति लालूभट्टः ।[2] तैलङ्गब्राह्मणानां वंशवृक्षे श्रीयज्ञनारायणभट्टस्य नाम सर्वादौ गण्यते । यज्ञनारायणभट्टस्य पुत्र अस्ति वश्विनाथभट्टः। वश्विनाथभट्टः पुष्टमार्गीयसम्प्रदाये (शुद्धाद्वैतवाददर्शनस्य भक्तविादे) दीक्षतिो भवति । मधुसूदनभट्टः भाणेजभट्टनाम्ना अपि ज्ञायते । श्रीबालकृष्णभट्टः कृष्णयजुर्वेदस्य तैत्तरिीयापस्तम्बशाखायाःअध्येता अस्ति। असौ आत्रेयगोत्रीयः अस्ति ।[3] श्रीबालकृष्णभट्टग्रन्थावल्याः अन्यद् ववरिणानुसारं मधुसूदनभट्टस्य पुत्रस्य त्रविक्रिमभट्टस्य


*Author for correspondence

Article Received on: 08.07.2025 *Peer-reviewed* Accepted on: 12.11.2025

पुत्रः श्रीलालूभट्टोपनामकः श्रीबालकृष्णभट्टः अस्ति ।[4] एतदतिरिच्य श्रीबालकृष्णभट्टस्य कस्यापि तथ्यस्य कस्मिन्निपि ग्रन्थे प्रामाणिकी चर्चा न भवति। तस्य वंशवृक्षः यथा -

3. लालूभट्टोपनामकस्य बालकृष्णभट्टस्य समयः

लालूभट्टोपनामकःश्रीबालकृष्णभट्टःसम्राजःसवाईजयसहिस्य आश्रितिः अस्ति। सवाईजयसहिस्य समयः 1631 ईशवीयाब्दतः 1671 ईशवीयाब्दपर्यन्तम् अर्थात् 1688 वक्रिमाब्दतः 1728 वक्रिमाब्दपर्यन्तम् स्वीकरयिते। अनेन श्रीबालकृष्णभट्टस्य समयः सप्तदशशतकिायाः उत्तरार्द्धः इति स्वीकर्तुं शक्यते ।[5] वल्लभसम्प्रदायस्य वद्विज्जनाः श्रीबालकृष्णभट्टं स्वामपिुरुषोत्तमस्य समसामयकिं वदन्ति। स्वामपिुरुषोत्तमस्य समयः 1724 वक्रिमाब्दः अर्थात् 1667 ईशवीयाब्दः इति इतहिासकारैः नश्चियते ।[6] श्रीबालकृष्णभट्टोऽपि स्वकीयदार्शनकिरचनायां श्रीपुरुषोत्तमस्वामनिः उल्लेखं बारम्बारं करोति। अतः तौ समकालीनौ इति सद्धिय्यति ।[7]



राजस्थानस्य कोटानगरे तस्य निवासः अस्ति। अधुना तस्मिन् स्थाने प्रसिद्धं बालकृष्णमन्दिरं वर्तते ।

लालूभट्टोपनामकः श्रीबालकृष्णभट्टः स्वकृतेषु भगवन्तं बालकृष्णं स्वकुलदेवतारूपेण स्तौति। सहैव सः श्रीवल्लभाचार्यस्य वट्ठिलनाथस्य अपि स्तुतिं करोति।[8] अलङ्कारसारग्रन्थस्यान्ते श्रीबालकृष्णभट्टः स्वपरिचयं 'गोवर्धनधरश्रीवल्लभाचार्यश्रीवट्ठिलेशवरचरणानुसेवकः इति रूपेण प्रददाति।[9] वल्लभसम्प्रदायस्य अन्यतमौ आचार्यौ स्तः - श्रीतेलीवालामहोदयः श्रीसाङ्कलीयामहोदयश्च । एतौ बालकृष्णभट्टस्य गुरुःगोस्वामी श्रीगिरिधारीति स्वीकुरुतः।[10]

4. लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य कृतयः

श्रीबालकृष्णभट्टस्य अनेकाःकृतयःसन्ति। तासां विवरणमत्र प्रदीयते –

प्रमेयरत्नार्णवः गिरिधिरगोस्वामिना विरचितस्य शुद्धाद्वैतमर्तण्डस्योपरि लालूभट्टोपनामकेन बालकृष्णभट्टेन प्रणीतः अयमेकः टीकाग्रन्थः अस्ति । अस्मिन् ग्रन्थे वल्लभमतस्य शुद्धाद्वैतसिद्धान्तानां सरलसंस्कृतभाषायां प्रतिपादनं कृतमस्ति। प्रमेयरत्नार्णवः पूर्वार्धे उत्तरार्धे च विभक्तःअस्ति। पूर्वार्धे सप्तप्रकरणानि सन्ति तथा चोत्तरार्धे प्रकरणत्रयमस्ति। प्रमेयरत्नार्णवस्य पूर्वार्धस्य प्रपञ्चविवेकनामके प्रथमे प्रकरणे मङ्गलाचरणस्य, ग्रन्थोपक्रमस्य, प्रमाणोपन्यासपुरस्सरा प्रपञ्चस्वरूपनिरूपणप्रतिज्ञाया; शब्दब्रह्मवादस्य निकृष्टस्य स्वरूपस्य, प्रकरणोपसंहरतया प्रपञ्चसंसारयोः भेदस्य शाङ्करवेदान्तेऽपि स्वीकार्यस्य, भगवन्मूर्त्यादिप्रित्यक्षे भेदोपभेदस्य विषये प्रदीयते।[11] जीवविवेकाख्ये द्वितीये प्रकरणे जीवरूपप्रमेयनिरूपणप्रतिज्ञाया; जीवानां शुद्धावस्थाया; जीवानां बद्धावस्थाया; मुक्तेः प्रकारचतुष्टयस्य, ऐहिकी-जीवन्मुक्तेः; पारलौकिकी-दिव्यलोकेषुस्थितेः; परामुक्तेः; नित्यलीलाप्रवेशस्य, आसुरजीवानां स्वरूप-सृष्टिस्थिति-मुक्तीनां, जीवानाम् अणुपरिमाणत्वोपपत्तेः; जीवानां व्यापकत्ववादीनां विषये व्याख्यानं समुपलभ्यते ।[12] तृतीये प्रकरणे मूलरूपविवेके श्रीकृष्णो हि परब्रह्म परमानन्दरूपः पुरुषोत्तमः प्राकृतगुण-धर्मादिकारादिरहितः अप्राकृतगुणधर्माकारादिरूपस्य, श्रीकृष्णस्य बहुविधानां रूपाणाम्, निखिलिप्रपञ्च-कार्यकारणभूत-स्वरूपस्य अक्षरब्रह्मापि श्रीकृष्णस्यैव रूपान्तरम् इत्यस्य, भगवद्भक्तभिाष्यस्य अक्षरस्य प्रथमस्वरूपस्य, ब्रह्मज्ञानभाष्यस्य अक्षरब्रह्मणो अपरस्वरूपस्य, जडसृष्टि-तदधिदैवानां नियमनार्थं पुरुषोत्तमस्यैव रूपान्तरस्य समष्ट्यन्तर्यामनिारायणस्य, समष्ट्यन्तर्यामनिां सर्वावतारमूलत्त्वादीनां विषये प्रतिपादनं परिलक्ष्यते ।[13] चतुर्थे प्रकरणे पुष्टिविवेके पुष्टिभक्तेः चातुर्विध्यानां, पुष्टिभक्त्याः भगवान् कथं भक्त्याधीनो भवति तथा च पुष्टिभक्तिलक्षणोपपत्तिर्भवति तस्याः कथायाः वर्णनं प्राप्यते ।[14] प्रमेयरत्नार्णवस्य पञ्चमे प्रकरणे पुष्टिभक्त्यधिकारविवेके चित्तिशुद्ध्यादयवस्थानवकस्य, सर्वात्मभावापन्नायाः भक्तेः फलावस्थास्वरूपस्य, आधुनिकजीवानां फलानुभूतौ प्रकारभेदानां विषये वर्णनं प्राप्यते ।[15] षष्ठे प्रकरणे सर्वात्मभावविवेके सर्वात्मभावस्य स्वरूप-प्रमाणयोः निरूपणस्य, सर्वात्मभाव इति पदस्य व्युत्पत्तेः; शुद्धपुष्टभिक्तमिार्गीयस्य सर्वात्मभावस्य शृङ्गारात्मकत्वस्य, अनुपपत्तिशङ्कापरिहारादेः विषये विवेचनं संप्राप्यते ।[16] पूर्वार्धस्य अन्तिमे सप्तमे प्रकरणे निरोध इति पदकृत्यनिरूपणस्य, निरोधस्य भगवद्धर्मरूपता-जीवरूपतयोः विषयस्य, ततः तृणावर्तोपशमनलीलानुभावनस्य, जानुरङ्गलीलानुभावनस्य, दोषदर्शनलीलानुभावनस्य, दधिमिण्डभाजनभेदनलीलानुभावनस्य, दामोदरलीलानुभावनस्य, यमलार्जुनलीलानुभावनस्य, गोपीस्तोभनिर्त्यलीलानुभावनस्य, गोचारणभावनस्य, परोपकारादिधर्माणां वैष्णवधर्माणां च निर्वाहादीनां विषये प्रतिपादनमधिगम्यते । तदेवम् अत्र पुष्टिमार्गीयसिद्धान्तस्य सुष्ठु प्रतिपादनमुपलभ्यते ।[17]

प्रमेयरत्नार्णवस्य उत्तरार्धे ख्यातिविवेकनामके प्रथमे प्रकरणे प्रत्यक्षादिज्ञानप्रकाराणां पञ्चविधिबुद्धिवृत्तिवृत्तिरूपिताया; विपर्यासरूपायाः बुद्धिवृत्तेः प्राकट्यप्रक्रियाया; प्रकृतिविषियानुसन्धानस्य, चक्षुर्ग्राह्यस्य विषयस्य ब्रह्मत्वोपपत्तेः; पुराणेषु प्रपञ्चमिथ्यात्वोक्तेः तात्पर्यनिरूपणादीनां विषये विवेचनं संप्राप्यते ।[18] द्वितीये मर्यादाभक्ति-पुष्टिभक्ति-पार्थक्य-विवेकनामके प्रकरणे सर्वासां भक्तीनां पुष्टिभक्तौ अन्तर्भावस्य, श्रीमद्भागवते उभयविध-भक्तिवंशयोः भेदनिरूपणादीनां विषये वर्णनं प्राप्यते ।[19] प्रमेयरत्नार्णवस्य तृतीये प्रकरणे नामफलविवेके विचार्यविषयवचनोपन्यासेन उपक्रमस्य, ज्ञानकर्मणो भक्तितुल्यतानिरसनस्य च विषये वर्णनं प्राप्यते ।[20]

निर्णयार्णवः

बालकृष्णभट्टस्य निर्णयार्णवे आचार्यचरणस्य श्रीवल्लभाचार्यस्य तथा च प्रभुचरणस्य श्रीविट्ठलेशवरस्य ग्रन्थबद्धानां सर्वेषां महत्त्वपूर्णानां वचनानां तात्पर्यं निर्धार्यते । अस्मिन् ग्रन्थे तरङ्गचतुष्टयमस्ति । प्रथमे तरङ्गे अनेकेषां ग्रन्थानां अनेकासां कारिकाणां च तात्पर्यनिर्णयः क्रियते ग्रन्थकारेण । द्वितीये तथा चतुर्थे तरङ्गेऽपि प्रथमतरङ्गवत् अनेककारिकाणां तात्पर्यनिर्णयः विधीयते । शेषभागे श्रीविट्ठलनाथस्य रचनानां विषये प्राप्यते । श्रीवल्लभाचार्यस्य श्रीविट्ठलनाथस्य च कृतीनां कतिपयानां रहस्यानाम् उन्मीलनम् अस्मिन् ग्रन्थे परिलक्ष्यते । प्रमेयरत्नार्णवस्य उल्लेखःअपि निर्णयार्णवे प्राप्यते ।[21]

सेवाकौमुदी

सेवाकौमुद्यां भगवत्सेवायाः संक्षिप्तविवरणं प्राप्यते । सेवाकौमुदीग्रन्थे प्रकरणत्रयमस्ति । प्रथमे प्रकरणे नवविधभक्तिस्वरूपस्य पुष्टिमार्गीयसेवायाःनिरूपणस्य व्याख्या प्राप्यते ।[22] द्वितीये प्रकरणे ब्रह्मविषयकसेवानिर्धारणस्य, ब्रह्मस्वरूप-निरूपणस्य, श्रीकृष्णस्य सेवाकार्यस्य, मूर्तिर्ति-शालग्रामयोः तारतम्यविचारोऽपि भवति ।[23] सेवाकौमुद्याः चतुर्थे प्रकरणे भगवत्स्वरूपभावना-सेवाभावनयोः मध्या-वसिङ्गत्याशङ्कासमाधानाय शङ्कोपक्रमाय, तत्समाधनाय,

स्त्रीभाववचिारोपक्रमाय, श्रीमद्भागवताध्यात्मकिार्थवचिारेणापि उक्तार्थोपपत्तये ववेिचना प्रदीयते ग्रन्थकारेण ।[24] सेवाकौमुद्याःतृतीयं प्रकरणं न सम्प्राप्यते ।[25]

उपर्युक्तस्य ग्रन्थत्रयस्य प्रकाशनं यद्यपि भन्नि-भन्निरूपेण भवति परन्तु बालकृष्णभट्टस्य लेखसहतिस्य वसि्तृतवाङ्मयस्य प्रकाशनं श्रीबालकृष्णग्रन्थावली नाम्ना श्रीवल्लभवद्यिापीठ-श्रीवट्ठिलेशप्रभुचरण.आ.हो.ट्रस्ट, वैभव को-ऑपरेटवि सोसायटी, कोल्हापुरम्, महाराष्ट्रात् भवति । तदुपरि श्रीबालकृष्णभट्टःश्रीवल्लभाचार्यस्य कृतीनामुपरि टीकाग्रन्थान् लखिति । तासु टीकासु उल्लेखयोग्याः टीकाः अधोलखिताःसन्ति–

नबिन्धयोजना टीका

श्रीवल्लभाचार्यस्य तत्त्वार्थदीपनबिन्धमालम्ब्य श्रीबालकृष्णभट्टः नबिन्धयोजना नाम्ना एकां टीकां वरिचयति । तत्त्वार्थनबिन्धस्य सम्पूर्णप्रकरणत्रयस्य टीका न समुपलभ्यते । वणजिः नारायणदासस्य तथा ज्येठानन्दस्य पुष्टमिार्गीय-ग्रन्थमालायां वक्रिमाब्दे 1999 तमे वर्षे, श्रीहरशिंकरशास्त्रणिा सम्पादतिे संस्करणे शास्त्रार्थप्रकरणं प्रथमं टीकाप्रकरणम् मुद्रतिं भवति।[26]

योजना टीका

श्रीवल्लभाचार्यःश्रीमद्भागवतस्योपरि सुबोधनिीटीकां लखिति । सुबोधनिीटीकोपरि श्रीबालकृष्णभट्टः योजना-नामकिां टीकां लखिति। दशमस्कन्धस्य 'जन्मप्रकरण सुबोधनिी' इत्यस्योपरि 'योजना' इति टीकायाः प्रथमतः चतुर्थाध्यायपर्यन्तम् प्रकाशनं वक्रिमाब्दे 1983 तमे वर्षे श्रीमग्नलालशास्त्री श्रीहरकृिष्णशास्त्री च मलित्विा नर्णियसागर-प्रेस, बम्बईतः कुरुतः । दशमस्कन्धस्य 'सुबोधनिी ' इत्यस्य पञ्चमतः अष्टावशितिःअध्यायपर्यन्तस्य योजनाटीका वक्रिमाब्दे 1993 तमे वर्षे श्रीधैर्यलालसांकलीयामहोदयेन कृतम् । ऊनवशितितिः पञ्चत्रशिदध्यायपर्यन्तं या सुबोधनिीटीका प्राप्यते, तस्याः योजनाटीका श्रीमूलचन्द्रतेलीवाला-वाडीलालशाहाभ्यां वक्रिमाब्दे 1981 तमे वर्षे 'गुजराती न्यूज' इति मूद्रणालयात् प्रकाशति । अन्येषाम् अध्यायानामुपरि योजनाटीका न उपलभ्यते ।[27]


ब्रह्मसूत्राणुभाष्यटीका

श्रीबालकृष्णभट्टः ब्रह्मसूत्रस्य श्रीवल्लभाचार्येण प्रणीतस्य अणुभाष्यस्योपरि टीकां वरिचयति । सा टीका वभिन्निैः वद्विद्भिः 'अणुभाष्यनगिूढार्थप्रकाशकिा', 'अणुभाष्यववरिणार्थप्रकाशकिा' अथवा 'योजना' इति नाम्ना परचिीयते । परन्तु एषा टीका सम्पूर्णतया नोपलभ्यते । अणुभाष्यस्य उपरि वरिचिता श्रीबालकृष्णभट्टस्य गूढार्थदीपकिाटीका 1921 आंगलाब्दे पुष्टमिार्गसद्धिान्तकार्यालयात् (बम्बईत) प्रकाश्यते।

श्रीवल्लभाचार्यस्य 'षोड़शग्रन्थः इति नामकरचनायाः उपरि लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य टीका प्राप्यते । आचार्यब्रजेशकुमारशुक्लमहोदयस्य श्रीबालकृष्णभट्टप्रणीतस्य अलङ्कारसारः इति ग्रन्थस्य सम्पादकीयववरिणानुसारं 'सद्धिान्तरहस्यम्', 'भक्तविर्धनी', 'सेवाफलम्' चेति ग्रन्थत्रयस्योपरि श्रीबालकृष्णभट्टस्य टीकाः प्राप्यन्ते ।[28] एतेषां प्रकाशनं श्रीतेलीवाला-श्रीसांकलीयामहोदयाभ्यां क्रमशः 1980, 1977 ख्रीष्टाब्दे तथा च 1973 वक्रिमाब्दे क्रयिते ।[29] तदुपरि परशिष्टिरूपेण कतपियलघुरचनाः लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य नाम्ना अपि प्रकाशताि:भवन्ति। अनेकाःअप्रकाशताि:रचनाःअपि श्रीबालकृष्णभट्टस्य नाम्ना संलक्ष्यन्ते ।[30] परन्तु ताःरचनाः लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य सन्ति वा नवेति, तत्र सन्देहो वर्तते । अतः वषियेऽस्मनि् नश्चितिरूपेण कस्य बालकृष्णभट्टस्य सन्तीति वक्तुं न शक्यते ।[31] अनेन ववेिचनेन स्पष्टं भवति यत् लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य रचनासु काव्यशास्त्रीयरचनाः सम्मलितिाः न सन्ति । अतः अलङ्कारसारः वल्लभसम्प्रदायस्य लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य रचना नास्ति इति स्पष्टम् ।[32]

5. त्रधिरोपनामकस्य श्रीबालकृष्णभट्टस्य जीवनम्

श्रीवल्लभाचार्यसम्प्रदायस्य अन्यः एकः श्रीबालकृष्णभट्टः यस्य उपनाम 'त्रधिरः अस्ति। असौ अलङ्कारसारः इति काव्यशास्त्रीयग्रन्थस्य रचयति अस्ति। तधिरःत्रधिरःवा इति शब्दः संस्कृते त्रगिृह-शब्देन परचिेतुं शक्यते । असौ कमिर्थं तधिर; त्रधिरो वेति उपनाम्ना प्रसद्धिः इत्यस्मनि् वषिये कमिपि प्रामाणकिं तथ्यं नोपलभ्यते । अलङ्कारसारग्रन्थस्य अध्यायानां पुष्पकिानुसारं श्रीबालकृष्णभट्टः दाक्षणिात्यकुलोत्पन्नः अर्थात् आन्ध्रप्रदेशीयब्राह्मणः अस्ति। अस्य पतिुःनाम गोवर्द्धनभट्टःअस्ति। तस्य वंशवृक्षः यथा –



सःकदाचति् स्वरचनासु 'श्रीकल्याणरायचरणकोकनदमधुपायमानः इतवािक्यस्य प्रयोगं करोति। अनेन वाक्येन परोक्षरूपेण

सः स्वगुरोः नाम कल्याणरायः इति वदति। तस्य गृहं गोकुलग्रामे अस्ति।[33] गोकुलग्रामः मथुरासमीपे अस्ति। तथा च गोकुलः श्रीकृष्णस्य क्षेत्रमिति प्रसिद्धिः। श्रीबालकृष्णभट्टः व्याकरण – मीमांसा - न्यायशास्त्रनिष्णातः अस्ति।[34]

एवम् अलङ्कारसारे प्राप्तप्रमाणानुसारं श्रीबालकृष्णभट्टस्य वषिये प्राप्यते।

अन्यसाक्ष्यानुसारं श्रीबालकृष्णभट्टस्य पुत्रस्य नाम गोविन्दराजः अस्ति। कृष्णाश्रयस्तोत्रस्य उपरि टिप्पणटीका गोविन्दराजेन वरिचिता, यत्र गोविन्दराजेन श्रीबालकृष्णभट्टः स्व-गुरुः स्वीक्रयिते।[35]

श्रीकृष्णाश्रयस्तोत्रस्य टीप्पणटीकायाः अन्ते श्रीगोविन्दराजः श्रीकल्याणरायस्य स्तुतिं कृत्वा बालकृष्णभट्टं स्वपतिरूपेण तथा च गुरुरूपेण सम्बोधयति।[36] अनेन हि स्पष्टमेतद् यत् गोविन्दराजोक्तः बालकृष्णभट्टः एव अलङ्कारसारस्य रचयिता अस्ति। कृष्णाश्रयस्तोत्रस्य टीप्पणटीकायाः व्याख्या पुष्पिका अपि अलङ्कारसारस्य रचयितुः बालकृष्णभट्टस्य पुष्टिं करोति। अलङ्कारसारस्य रचयिता बालकृष्णभट्टः यथा 'श्रीमत्कल्याणरायचरणकोकन दमधुपायमानः, 'त्रिघिरः चेति उपनाम्ना वभिूषितो भवति, तथैव सः टीप्पणटीकायाः पदावल्याः अन्ते समुद्धृतः प्राप्यते।[37] श्रीबालकृष्णभट्टप्रणीते अलङ्कारसारे केषुचित् स्थानेषु तस्य मातामहस्य वषिये प्राप्यते।[38] तस्य मातामहः कः अस्ति अथवा तस्य नाम किम्, एतेषाम् उल्लेखः प्रायशः ग्रन्थकारेण न क्रयिते। परन्तु एवं प्रतीयते यत् बालकृष्णभट्टस्य मातामहः विद्वान् कविचासीत्। अलङ्कारसारे श्रीबालकृष्णभट्टप्रणीते श्लोके अस्मिन् वषिये प्रमाणं प्राप्यते।[39] एतदतरिक्तम् अन्यत्किमपि तथ्यजातं तस्मिन् वषिये नोपलभ्यते।

त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य कालः

अलङ्कारसारस्य समयः अधस्तनैः कतपियतथ्यैः नरि्धारयतिुं शक्यते –

- श्रीबालकृष्णभट्टः स्वकीये अलङ्कारसारे पण्डतिराजस्य रसगंगाधरस्य तथा च अप्पयदीक्षतिस्य चत्रिमीमांसायाः कुवलयानन्दस्य च बहुवारम् उल्लेखं करोति। अप्पयदीक्षतिस्य समयः 1559-1613 ईशवीयाब्दः अस्ति।[40] तथैव रसगंगाधरस्य रचयिता पण्डतिराजस्य जगन्नाथस्य समयोऽपि 1620-1660 समालोचकैः अनुमीयते।
- अलङ्कारसारे काव्यप्रकाशस्य प्रदीपटीकायाः रचयितुः श्रीगोविन्दठक्कुरस्य उल्लेखः अस्ति।[41] अस्य कालः षोड़शशताब्द्याः अन्तमिचरणस्य पूर्वमति मिानतिुं शक्यते।
- अलङ्कारसारे श्रीबालकृष्णभट्टः मम्मटानन्दवर्धन – जयदेव - वशि्वनाथदीनाम् आचार्याणाम् उल्लेखं करोति। ते तत्पूर्ववर्तनिः प्राचीनाः प्रसद्धिाचार्याः सन्ति।
- श्रीवल्लभसम्प्रदायस्य श्रीकल्याणरायस्य वट्ठिलस्य च उल्लेखः अलङ्कारसारे प्राप्यते। षोड़शशताब्द्याः पूर्वार्धः श्रीवट्ठिलनाथस्य समयः मन्यते।[42] श्रीकल्याणरायस्य समयः ततोऽपि पूर्वमति स्वीक्रयिते।
- अलङ्कारसारस्य मातृकायाः लपिकिालः 1758 वक्रिमसंवत्सरे अर्थात् 1702 ईशवीयाब्दे अस्ति। अतः अलङ्कारसारस्य रचना ईतः पूर्वं भवतीति वक्तुं शक्यते।
- डा. सुशीलकुमारदे-महोदयः अलङ्कारसारस्य रचना 1625-1700 ईशवीयाब्दयोः मध्यभागः इति स्वीकरोति। पी.वी. काणे-महोदयः उपर्युक्तः कालः एव अलङ्कारसारस्य रचनाकालः इति स्वीकरोति। अतः श्रीबालकृष्णभट्टस्य समयः 1625-1700 ईशवीयाब्दयोः मध्ये एव भवतीति वक्तुं शक्यते। तदुपरि डा. रूद्रदेवत्रपिाठी डा. आनन्दकुमारश्रीवास्तवः चापि अलङ्कारसारस्य रचनाकालः 1625-1700 ख्रीष्टाब्दयोः मध्यभागे इति स्वीकुरुतः।[43]

6. अलङ्कारसारस्य रचनाकालः

अलङ्कारसारस्य कालं नरि्धार्य अपि श्रीबालकृष्णभट्टस्य कालः नरि्धारयतिुं शक्यते। अलङ्कारसारस्य कालः अति सरजतया नरि्धारयतिुं शक्यते यतो हि अस्मिन् ग्रन्थे अनेकेषाम् आचार्याणां ग्रन्थानां उल्लेखः प्राप्यते। अलङ्कारसारस्य प्रणेता श्रीवल्लभाचार्यसम्प्रदाये दीक्षतिः अस्ति तथा च श्रीकल्याणरायस्य स्तुतिः तेन तत्र क्रयिते।[44] पुष्टमिार्गीयवल्लभसम्प्रदाये बालकृष्णभट्टनामकौ द्वौ आचार्यौ स्तः। तयोः वर्णनं पूर्वं क्रयिते। अलङ्कारसारः इति ग्रन्थे परवर्तग्रिन्थकाराणां चर्चा नाधगिम्यते। अधोलखितैः तथ्यैः अलङ्कारसारस्य कालः नरि्धारयतिुं शक्यते –

- श्रीवल्लभमतानुसारं त्रिघिरनामकेन श्रीबालकृष्णभट्टेन वरिचतित्वात् अलङ्कारसारः 1533 तमस्य आंगलाब्दस्य परवर्तकिालस्य रचना भवष्यिति, यतो हि श्रीवल्लभाचार्यस्य समयः 1481-तः 1533 तमे ख्रीष्टाब्दे अस्ति।
- अलङ्कारसारे आचार्यममम्मट; वशि्वनाथकवरिाज; जयदेव; शुद्धोद्धनि; दण्डी चेत्येषामालङ्कारकिाणाम् उल्लेखः विद्यते। अतः अलङ्कारसारः एतेषाम् आचार्याणां परवर्तकिालकिः इति वक्तुं शक्यते।
- अलङ्कारसारे काव्यप्रकाशस्य टीकाकारस्य गोविन्दठक्कुरस्य, रसगंगाधरस्य रचयितुः पण्डतिराज-जगन्नाथस्य, कुवलयानन्दस्य चत्रिमीमांसायाः रचयितुः अप्पयदीक्षतिस्य चापि उल्लेखः प्राप्यते। अप्पयदीक्षतिस्य समयः 1549 तमाङ्गलवर्षतः 1613 तमवर्षपर्यन्तमति नरि्धार्यते।[45] पण्डतिराज-जगन्नाथस्य कालः 1620 ख्रीष्टाब्दतः 1660 ख्रीष्टाब्दस्य मध्यभागः इति आलोचकैः स्थरीक्रयिते।[46] अतः अलङ्कारसारस्य समयः 1660 तमख्रीष्टाब्दवर्षस्य पश्चादेव भवतीति वक्तुं युज्यते।
- डा. सुशील कुमार दे- महोदयेन अलङ्कारसारस्य रचना 1625 तमख्रीष्टाब्दवर्षात् 1700 तमवर्षस्य मध्यभागे भवतीति मन्यते।[47]

अतः बालकृष्णभट्टस्य समयः 1625 ख्रीष्टाब्दतः 1700 ख्रीष्टाब्दमध्ये स्वीकर्तुं शक्यते।

7. लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य तथा त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य मध्ये भिन्नता –

लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टः तथा च त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य मध्ये भिन्नता परिलक्ष्यते। द्वौ भिन्नौ पुरुषौ स्तः। द्वयोःभिन्नतां प्रदर्शयितुं एतानि कारणानि सम्भवन्ति –

- श्रीबालकृष्णभट्टस्य उपाधिः लालूभट्टः अस्ति, परन्तु अलङ्कारसारप्रणेता श्रीबालकृष्णभट्टः त्रिघिर-नाम्ना उच्यते।
- लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य पितुः नाम मधुसूदनभट्टः अस्ति, परन्तु त्रिगृहोपनामकस्य श्रीबालकृष्णभट्टस्य पितुः नाम गोवर्धनभट्टः अस्ति।
- लालूभट्टोपनामा श्रीबालकृष्णभट्टः 'श्रीगोवर्धनधरश्रीवल्लभाचार्यः श्रीवट्ठिलेश्वरचरणानुसेवकः नाम्ना ज्ञायते। परन्तु त्रिगृहोपनामा श्रीबालकृष्णभट्टः'श्रीमत् कल्याणरायचरणकोकनदमधुपायन' नाम्ना ज्ञायते।
- श्रीलालूभट्टस्य निवासः जयपुरे भवति। तथा च त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य निवासः गोकुलग्रामे भवति।
- श्रीबालकृष्णभट्टस्य अर्थात् लालूभट्टस्य रचनासु अलङ्कारसारस्य तत्प्रणेतुश्च उल्लेखो न भवति। तदुपरि त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य कृतिषु लालूभट्टस्य तस्य रचनानाञ्च उल्लेखो न भवति।
- द्वौ बालकृष्णभट्टौ एव प्रायशःसमसामयिकौ स्तः।
- लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य रचनाः प्रायशः सर्वे जानन्ति। परन्तु त्रिगृहोपनामकस्य श्रीबालकृष्णभट्टस्य रचनाः अज्ञाताः सन्ति। तस्य रचनासु अलङ्कारसारः इत्याख्यं ग्रन्थं सर्वादौ आचार्यबृजेशकुमारशुक्लमहोदयेन सम्पाद्य ग्रन्थोऽयं पाठकानां सहृदयानां समक्षमुपस्थापितः।

अतः उपरि समुद्धृतानि तथ्यानि विविच्य एतत् वक्तुं शक्यते यत् लालूभट्टोपनामकः श्रीबालकृष्णभट्टश्चेति तथा च त्रिगृहोपनामकः श्रीबालकृष्णभट्टश्चेति भिन्नौ स्तः। अलङ्कारसारः इतिनामधेयः काव्यशास्त्रीयग्रन्थः त्रिगृहोपनामकस्य श्रीबालकृष्णभट्टस्य एव रचना अस्ति।

8. त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य कर्तृत्वम्

त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य अलङ्कारसारातिरिक्ताअन्याःरचनाःनज्ञायन्ते। अलङ्कारसारे काव्यप्रकाशस्य एका कारिका[48] शुद्धोद्धनविरचिता इति उच्यते। अतःतत्कालीनाःविद्वांसःश्रीभट्टःच काव्यप्रकाशस्य कारिकाः शुद्धोद्धननिः कृतरिति मन्यन्ते। अलङ्कारसारे केषुचित् स्थानेषु श्रीबालकृष्णभट्टःस्वरचितान् श्लोकान् अपि समुल्लिखति। एते श्लोकाःवल्लभसम्प्रदायप्रभावयुक्ताःसन्ति अर्थात् वल्लभसम्प्रदायस्य प्रभावः संस्कारः च तेषु श्लोकेषु परिलक्ष्येते। केषाञ्चित् पण्डितानां मतेन श्रीबालकृष्णभट्टः वल्लभसम्प्रदायोपेतस्य स्तुतिकाव्यस्य अपि रचनां करोति, परन्तु तत् काव्यम् अद्यापि नोपलभ्यते। डा. एस्. एन्. दासगुप्तानुसारं श्रीवल्लभाचार्यस्य भक्तिवर्धिनी नामधेयायाः लघुपुस्तिकायाःउपरि त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य तथा च लालूभट्टोपनामकस्य श्रीबालकृष्णभट्टस्य द्वौ टीकाग्रन्थौ स्तः।[49]

त्रिघिरोपनामा श्रीबालकृष्णभट्टः साहित्यपरियिः काव्यशास्त्रीयः आचार्यः अस्ति। सः अलङ्कारसारः इति नामधेयं काव्यशास्त्रं विरच्य पूर्ववर्तिनां परवर्तिनां चाचार्याणां काव्यशास्त्रीयविषयेषु समन्वयं करोति। वैष्णव सम्प्रदायान्तर्गतवल्लभमतानुवर्ती एषः आचार्यः निश्चयेन काव्यशास्त्रीयविद्वान् अस्ति। सः स्वकीये ग्रन्थे इतस्ततः मौलिकानि सूत्राणि अपि प्रतिपादयति।

श्रीबालकृष्णभट्टेन वल्लभाचार्यस्य मधुराष्टकस्योपरि एका टीका विरचिता।[50] सा टीका त्रिघिरोपनामकस्य श्रीबालकृष्णभट्टस्य एव कृतिरिस्ति इति केषाञ्चिदभिमतम्। तदुपरि श्रीबालकृष्णभट्टनामधेयाः अनेके आचार्याः संस्कृतवाङ्मये प्राप्यन्ते, तेषां प्रकाशिताः अप्रकाशिताः च रचनाः अपि विद्यमानाः सन्ति।[51] तासाञ्चोल्लेखः अस्माभि प्रागेव विहितोऽस्ति।

9. सन्दर्भसूची

1. *The New Catalogus Catalogorum*, 13th Volume, P. 267-269
2. केचिदाचार्यज्ञातजिनास्तैलङ्गदेशीया विद्वांसो ब्राह्मणाःश्रीमद्वट्ठिलेश्वरप्रभुचरणैःगोकुले समानीताः। तैःसह श्रीमत्प्रभुचरणैःकन्यादानव्यवहारो रक्षितिः। एतादृशेषु ब्राह्मणेषु द्वौ भ्रातरौ गोविन्दकृष्णभट्टो बभूवतुः। ययोर्भगिनी श्रीरुक्मिणी श्रीमत्प्रभुचरणैः स्वपत्नीत्वेन स्वीकृता। आत्रेयापस्तम्बविश्वनाथस्य पुत्रौ ह्येतौ। विश्वनाथभट्टवंश्येषु कश्चिन्मधुसूदनभट्टो बभूव। तस्य मधुसूदनभट्टस्य सूनव एते लालूभट्टोपनामबालकृष्णदीक्षिताः; प्रमेयरत्नार्णव; उपोद्धात-टिप्पणी, पृ. 13
3. तत्रैव
4. श्रीबालकृष्णभट्ट-ग्रन्थावली, प्राक्कथन, पृ. 5
5. अलङ्कारसार; सम्पादकीयम्, पृ. 12
6. तत्रैव, सम्पादकीयम्, पृ. 12
7. तत्रैव, सम्पादकीयम्, पृ. 12
8. श्रीबालकृष्णःकुलदैवतं मे (प्रमेयरत्नार्णव; पुरोवाक्; श्लोकः- 2)
   श्रीबालकृष्णःकृष्णोऽस्मत्कुलपतिःप्रसीदतु (निर्णयार्णव; पृ. 45)
   यशोदोत्संगसंशोभिबालकृष्णं नमाम्यहम् (निर्णयार्णव; चतुर्थतरंगस्य प्रारम्भे)
9. अलङ्कारसार; सम्पादकीयम्, पृ. 13

10. अलङ्कारसार; सम्पादकीयम्, पृ. 13
11. श्रीबालकृष्ण-ग्रन्थावली, पृ. 1-12
12. श्रीबालकृष्ण-ग्रन्थावली, पृ. 13-20
13. श्रीबालकृष्ण-ग्रन्थावली, पृ. 21-30
14. श्रीबालकृष्ण-ग्रन्थावली, पृ. 31-43
15. श्रीबालकृष्ण-ग्रन्थावली, पृ. 44-53
16. श्रीबालकृष्ण-ग्रन्थावली, पृ. 54-58
17. श्रीबालकृष्ण-ग्रन्थावली, पृ. 59-81
18. श्रीबालकृष्ण-ग्रन्थावली, पृ. 82-98
19. श्रीबालकृष्ण-ग्रन्थावली, पृ. 99-104
20. श्रीबालकृष्ण-ग्रन्थावली, पृ. 105-110
21. श्रीबालकृष्ण-ग्रन्थावली, पृ. 111-188
22. श्रीबालकृष्ण-ग्रन्थावली, पृ. 189-198
23. श्रीबालकृष्ण-ग्रन्थावली, पृ. 199-208
24. श्रीबालकृष्ण-ग्रन्थावली, पृ. 209-213
25. श्रीबालकृष्ण-ग्रन्थावली, पृ. 38
26. अलङ्कारसार; सम्पादकीयम्, पृ. 14
27. अलङ्कारसार; सम्पादकीयम्, पृ. 14
28. अलङ्कारसार; सम्पादकीयम्, पृ. 14
29. अलङ्कारसार; सम्पादकीयम्, पृ. 15
30. तत्रैव
31. अलङ्कारसार; सम्पादकीयम्, पृ. 15
32. तत्रैव
33. श्रीवल्लभाचार्यमतानुवर्त्ततिघिरोपनामकश्रीमत्कल्याणरायचरणकोकनदमधुपायमानगोवर्द्धनभट्टात्मजदाक्षणिात्यकुलोद्भूत-गोकुलग्रामवास्तव्यबालकृष्णभट्टकृतावलंकारसारे...अमूकनरूिपणं नाम अमूकोल्लासः।। (अलङ्कारसारस्य सर्वेषु उल्लासेषु)
34. श्रीगोकुलवास्तव्यो बालकृष्णाभधिःसुधीः।
पदवाक्यप्रमाणज्ञो नबिन्धं कृतवानमिम् ।। अलङ्कारसार; मातृका 'ख' – पृ. 132-133
35. आचार्यचरणद्वन्द्ववन्दनानन्दतिात्मना ।
शष्यिेण बालकृष्णानां कञ्चिदित्र वचिारतिम् ।।
अलङ्कारसार; पृ. 16 ।
36. श्रीमत्कल्याणरायाणां नमस्कृत्य पदद्वयम् ।
कृष्णाश्रयप्रकाशस्य तत्प्रणीतस्य टप्पिणम् ।।
गुरुश्रीबालकृष्णानामात्मजेन सतां मतम् ।
कृतं गोवन्दिराजेन नाम्ना तत्त्वनरिुपणम् ।।
(कृष्णाश्रयस्तोत्रम्, टप्पिणटीका, पृ. 22)
37. इतं श्रीमत्कल्याणरायचरणकोकनदमधुपायमानमानान्तःकरणतघिरोपनामकबालकृभट्टात्मजगोवन्दिराज कृतं तत्त्वनरिूपणाभधिं कृष्णाश्रयप्रकाशनटप्पिणं समाप्तमिगमत् । (कृष्णाश्रयस्तोत्रम्, टप्पिणटीका, पृ. 25)
38. श्रीमन्मातामहचरणानाम् –
कथं माद्यतु मे चेतःस्मरणेनैव भृङ्गवत् ।
रसालं भक्तयिोगं हि ने लेभे माधवस्य यत् ।। अलङ्कारसारः 1/6
श्रीमन्मातामहानाम् –
भृङ्गवत्सर्वदा सौख्यं गोकुलेशपदाम्बुजम् ।
बद्धो मोक्षमतक्रिामेदाश्रतिो वन्दिते रसम् ।।
अलङ्कारसारः2/3
श्रीमन्मातामहचरणानाम् –
ज्ञानेन साधनैश्चान्यैःशून्यानस्मान्मुदा ।
अनुगृह्णातिसोऽस्माकं प्रभुःवट्ठिलेश्वरः।। अलङ्कारसारः 4/62
39. श्रीमन्मातामहचरणानाम् –
हरत्यघं सम्प्रति हेतुरष्यितः
शुभस्य पूर्वाचरतिैःकृतं शुभैः।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रतियेऽपि योग्यताम् ।। अलङ्कारसार; 4/63 ।
श्रीमत्कल्याणराय त्वदुपचतियशो राशभिश्छिादयमाने ।
लोके दक्षस्य कन्या व्यवृणुत मृगतिं लक्ष्मणा तं मृगाङ्कम् ।।
स्रष्टा तत्पादचञ्चुन्यरणमिवशिदीभाव्यमानं हियानम् ।
जज्ञे भृङ्गीयपङ्क्तिःसुरभविकिसतिं पुण्डरीकं स्वकं च ।।
अलङ्कारसार; 4/64 ।
40. संस्कृतकाव्यशास्त्र का इतहिास, सुशील कुमार डे, पृ. 205 ।
41. अलङ्कारसार; पृ. 1
42. *Vidvanmaṇḍana – Śrī Viṭṭhaleśvara and His Vidvanmaṇḍana*, पृ. 8-9
43. शब्दालंकार साहत्यि का समीक्षात्मक सर्वेक्षण, पृ. 80, आधुनकि संस्कृत काव्यशास्त्र, पृ. 54
44. व्याकृतां त्रमिुनीयते रतपिथे श्रीकृष्णवक्त्रायते
तर्के गोतमगु(म्फतिागमगरि) गम्ये च कर्त्तरीयते ।
भाषावादवविादवेदवविशेऽब्दो जायते यो महां –
श्चेतस्तं भज कार्यसदि्धि(सुमनुं) कल्याणरायाभधिम् ।। अलङ्कारसार; 1/2
45. अलङ्कारसार; पृ. 21
46. तत्रैव
47. *History of Sanskrit Poetics*, Dr. S.K. Dey, Pages – 291-292
48. काव्यं यशसेऽर्थकृते व्यवहारवदि शवितेरक्षतये ।
सद्यःपरनवृित्तये कान्तासम्मतितयोपदेशयुजे ।।
अलङ्कारसार; 1/4
49. भारतीय दर्शन का इतहिास, एस्. एन्. दासगुप्त, भाग – 4, पृ. 380
50. भारतीय दर्शन का इतहिास, एस्. एन्. दासगुप्त, भाग – 4, पृ. 379
51. *The New Catalogus Catalogorum* (Volume-13), Pages – 264-270